# .. nArada rachita kRiShNastotra ..

# ॥ શ્રીકૃષ્ણસ્તોત્રં શ્રીનારદરચિતમ્ ॥

## Document Information

Text title : nArada rachita kRiShNastotra

File name : naaradakrishnastotra.itx

Location : doc_vishhnu

Author : Traditional

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : nAradapa.ncharAtra

Latest update : January 16, 2005

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીકૃષ્ણસ્તોત્રં શ્રીનારદરચિતમ્ ॥

શ્રી ગણેશાય નમઃ ।
વન્દે નવઘનશ્યામં પીતકૌશેયવાસસમ્ ।
સાનન્દં સુન્દરં શુદ્ધં શ્રીકૃષ્ણં પ્રકૃતેઃ પરમ્ ॥ ૧॥

રાધેશં રાધિકાપ્રાણવલ્લભં બલ્લવીસુતમ્ ।
રાધાસેવિતપાદાબ્જં રાધાવક્ષઃસ્થલસ્થિતમ્ ॥ ૨॥

રાધાનુગં રાધિકેષ્ટં રાધાપહૃતમાનસમ્ ।
રાધાધારં ભવાધારં સર્વાધારં નમામિ તમ્ ॥ ૩॥

રાધાહૃત્પદ્મમધ્યે ચ વસન્તં સન્તતં શુભમ્ ।
રાધાસહચરં શશ્વદ્રાધાજ્ઞાપરિપાલકમ્ ॥ ૪॥

ધ્યાયન્તે યોગિનો યોગાન્ સિદ્ધાઃ સિદ્ધેશ્વરાશ્ચ યમ્ ।
તં ધ્યાયેત્ સતતં શુદ્ધં ભગવન્તં સનાતનમ્ ॥ ૫॥

સેવન્તે સતતં સન્તો બ્રહ્મેશશેષસઞ્જ્ઞકાઃ ।
સેવન્તે નિર્ગુણં બ્રહ્મ ભગવન્તં સનાતનમ્ ॥ ૬॥

નિર્લિપ્તં ચ નિરીહં ચ પરમાત્માનમીશ્વરમ્ ।
નિત્યં સત્યં ચ પરમં ભગવન્તં સનાતનમ્ ॥ ૭॥

યં સૃષ્ટેરાદિભૂતં ચ સર્વબીજં પરાત્પરમ્ ।
યોગિનસ્તં પ્રપદ્યન્તે ભગવન્તં સનાતનમ્ ॥ ૮॥

બીજં નાનાવતારાણાં સર્વકારણકારણમ્ ।
વેદાવેદ્યં વેદબીજં વેદકારણકારણમ્ ॥ ૯॥

યોગિનસ્તં પ્રપદ્યન્તે ભગવન્તં સનાતનમ્ ।
ઇત્યેવમુક્ત્વા ગન્ધર્વઃ પપાત ધરણીતલે ॥ ૧૦॥

નમામ દણ્ડવદ્ ભૂમૌ દેવદેવં પરાત્પરમ્ ।
ઇતિ તેન કૃતં સ્તોત્રં યઃ પઠેત્ પ્રયતઃ શુચિઃ ॥ ૧૧॥

ઇહૈવ જીવન્મુક્તશ્ચ પરં યાતિ પરાં ગતિમ્ ।
હરિભક્તિં હરેર્દાસ્યં ગોલોકે ચ નિરામયઃ ॥ ૧૨॥

પાર્ષદપ્રવરત્વં ચ લભતે નાઽત્ર સંશયઃ ॥ ૧૩॥

॥ ઇતિ નારદપઞ્ચરાત્રે કૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

.. nArada rachita kRiShNastotra ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*